# शिवानन्द लहरि

कलाभ्यां चूडालङ्कृत-शशि कलाभ्यां निज तपः-
फलाभ्यां भक्तॆशु प्रकटित-फलाभ्यां भवतु मॆ ।
शिवाभ्यां-अस्तॊक-त्रिभुवन शिवाभ्यां हृदि पुनर्-
भवाभ्याम् आनन्द स्फुर-दनुभवाभ्यां नतिरियम् ॥ 1 ॥

गलन्ती शम्भॊ त्वच्-चरित-सरितः किल्बिश-रजॊ
दलन्ती धीकुल्या-सरणिशु पतन्ती विजयताम्
दिशन्ती संसार-भ्रमण-परिताप-उपशमनं
वसन्ती मच्-चॆतॊ-हृदभुवि शिवानन्द-लहरी 2

त्रयी-वॆद्यं हृद्यं त्रि-पुर-हरम् आद्यं त्रि-नयनं
जटा-भारॊदारं चलद्-उरग-हारं मृग धरम्
महा-दॆवं दॆवं मयि सदय-भावं पशु-पतिं
चिद्-आलम्बं साम्बं शिवम्-अति-विडम्बं हृदि भजॆ 3

सहस्रं वर्तन्तॆ जगति विबुधाः क्शुद्र-फलदा
न मन्यॆ स्वप्नॆ वा तद्-अनुसरणं तत्-कृत-फलम्
हरि-ब्रह्मादीनां-अपि निकट-भाजां-असुलभं
चिरं याचॆ शम्भॊ शिव तव पदाम्भॊज-भजनम् 4

स्मृतौ शास्त्रॆ वैद्यॆ शकुन-कविता-गान-फणितौ
पुराणॆ मन्त्रॆ वा स्तुति-नटन-हास्यॆशु-अचतुरः

कथं राज्नां प्रीतिर्-भवति मयि कॊ(अ)हं पशु-पतॆ
पशुं मां सर्वज्न प्रथित-कृपया पालय विभॊ 5

घटॊ वा मृत्-पिण्डॊ-अपि-अणुर्-अपि च धूमॊ-अग्निर्-अचलः
पटॊ वा तन्तुर्-वा परिहरति किं घॊर-शमनम्
वृथा कण्ठ-क्शॊभं वहसि तरसा तर्क-वचसा
पदाम्भॊजं शम्भॊर्-भज परम-सौख्यं व्रज सुधीः 6

मनस्-तॆ पादाब्जॆ निवसतु वचः स्तॊत्र-फणितौ
करौ च-अभ्यर्चायां श्रुतिर्-अपि कथाकर्णन-विधौ
तव ध्यानॆ बुद्धिर्-नयन-युगलं मूर्ति-विभवॆ
पर-ग्रन्थान् कैर्-वा परम-शिव जानॆ परम्-अतः 7

यथा बुद्धिः-शुक्तौ रजतम् इति काचाश्मनि मणिर्-
जलॆ पैश्टॆ क्शीरं भवति मृग-तृश्णासु सलिलम्
तथा दॆव-भ्रान्त्या भजति भवद्-अन्यं जड जनॊ
महा-दॆवॆशं त्वां मनसि च न मत्वा पशु-पतॆ 8

गभीरॆ कासारॆ विशति विजनॆ घॊर-विपिनॆ
विशालॆ शैलॆ च भ्रमति कुसुमार्थं जड-मतिः
समर्प्यैकं चॆतः-सरसिजम् उमा नाथ भवतॆ
सुखॆन-अवस्थातुं जन इह न जानाति किम्-अहॊ 9

नरत्वं दॆवत्वं नग-वन-मृगत्वं मशकता
पशुत्वं कीटत्वं भवतु विहगत्वादि-जननम्

सदा त्वत्-पादाब्ज-स्मरण-परमानन्द-लहरी
विहारासक्तं चॆद्-हृदयं-इह किं तॆन वपुशा 10

वटुर्वा गॆही वा यतिर्-अपि जटी वा तदितरॊ
नरॊ वा यः कश्चिद्-भवतु भव किं तॆन भवति
यदीयं हृत्-पद्मं यदि भवद्-अधीनं पशु-पतॆ
तदीयस्-त्वं शम्भॊ भवसि भव भारं च वहसि 11

गुहायां गॆहॆ वा बहिर्-अपि वनॆ वा(अ)द्रि-शिखरॆ
जलॆ वा वह्नौ वा वसतु वसतॆः किं वद फलम्
सदा यस्यैवान्तःकरणम्-अपि शम्बॊ तव पदॆ
स्थितं चेद्-यॊगॊ(अ)सौ स च परम-यॊगी स च सुखी 12

असारॆ संसारॆ निज-भजन-दूरॆ जडधिया
भरमन्तं माम्-अन्धं परम-कृपया पातुम् उचितम्
मद्-अन्यः कॊ दीनस्-तव कृपण-रक्शाति-निपुणस्-
त्वद्-अन्यः कॊ वा मॆ त्रि-जगति शरण्यः पशु-पतॆ 13

प्रभुस्-त्वं दीनानां खलु परम-बन्धुः पशु-पतॆ
प्रमुख्यॊ(अ)हं तॆशाम्-अपि किम्-उत बन्धुत्वम्-अनयॊः
त्वयैव क्शन्तव्याः शिव मद्-अपराधाश्-च सकलाः
प्रयत्नात्-कर्तव्यं मद्-अवनम्-इयं बन्धु-सरणिः 14

उपॆक्शा नॊ चॆत् किं न हरसि भवद्-ध्यान-विमुखां
दुराशा-भूयिश्ठां विधि-लिपिम्-अशक्तॊ यदि भवान्

शिरस्-तद्-वदिधात्रं न नखलु सुवृत्तं पशु-पतॆ
कथं वा निर्-यत्नं कर-नख-मुखॆनैव लुलितम् 15

विरिन्चिर्-दीर्घायुर्-भवतु भवता तत्-पर-शिरश्-
चतुश्कं संरक्श्यं स खलु भुवि दैन्यं लिखितवान्
विचारः कॊ वा मां विशद-कृपया पाति शिव तॆ
कटाक्श-व्यापारः स्वयम्-अपि च दीनावन-परः 16

फलाद्-वा पुण्यानां मयि करुणया वा त्वयि विभॊ
प्रसन्नॆ(अ)पि स्वामिन् भवद्-अमल-पादाब्ज-युगलम्
कथं पश्यॆयं मां स्थगयति नमः-सम्भ्रम-जुशां
निलिम्पानां श्रॆणिर्-निज-कनक-माणिक्य-मकुटैः 17

त्वम्-ऎकॊ लॊकानां परम-फलदॊ दिव्य-पदवीं
वहन्तस्-त्वन्मूलां पुनर्-अपि भजन्तॆ हरि-मुखाः
कियद्-वा दाक्शिण्यं तव शिव मदाशा च कियती
कदा वा मद्-रक्शां वहसि करुणा-पूरित-दृशा 18

दुराशा-भूयिश्ठॆ दुरधिप-गृह-द्वार-घटकॆ
दुरन्तॆ संसारॆ दुरित-निलयॆ दुःख जनकॆ
मदायासम् किं न व्यपनयसि कस्यॊपकृतयॆ
वदॆयं प्रीतिश्-चॆत् तव शिव कृतार्थाः खलु वयम् 19

सदा मॊहाटव्यां चरति युवतीनां कुच-गिरौ
नटत्य्-आशा-शाखास्-वटति झटिति स्वैरम्-अभितः

कपालिन् भिक्शॊ मॆ हृदय-कपिम्-अत्यन्त-चपलं
दृढं भक्त्या बद्ध्वा शिव भवद्-अधीनं कुरु विभॊ 20

धृति-स्तम्भाधारं दृढ-गुण निबद्धां सगमनां
विचित्रां पद्माढ्यां प्रति-दिवस-सन्मार्ग-घटिताम्
स्मरारॆ मच्चॆतः-स्फुट-पट-कुटीं प्राप्य विशदां
जय स्वामिन् शक्त्या सह शिव गणैः-सॆवित विभॊ 21

प्रलॊभाद्यैर्-अर्थाहरण-पर-तन्त्रॊ धनि-गृहॆ
प्रवॆशॊद्युक्तः-सन् भ्रमति बहुधा तस्कर-पतॆ
इमं चॆतश्-चॊरं कथम्-इह सहॆ शन्कर विभॊ
तवाधीनं कृत्वा मयि निरपराधॆ कुरु कृपाम् 22

करॊमि त्वत्-पूजां सपदि सुखदॊ मॆ भव विभॊ
विधित्वं विश्णुत्वम् दिशसि खलु तस्याः फलम्-इति
पुनश्च त्वां द्रश्टुं दिवि भुवि वहन् पक्शि-मृगताम्-
अदृश्ट्वा तत्-खॆदं कथम्-इह सहॆ शन्कर विभॊ 23

कदा वा कैलासॆ कनक-मणि-सौधॆ सह-गणैर्-
वसन् शम्भॊर्-अग्रॆ स्फुट-घटित-मूर्धान्जलि-पुटः
विभॊ साम्ब स्वामिन् परम-शिव पाहीति निगदन्
विधातॄऋणां कल्पान् क्शणम्-इव विनॆश्यामि सुखतः 24

स्तवैर्-ब्रह्मादीनां जय-जय-वचॊभिर्-नियमानां
गणानां कॆलीभिर्-मदकल-महॊक्शस्य ककुदि

स्थितं नील-ग्रीवं त्रि-नयनं-उमाश्लिश्ट-वपुशं
कदा त्वां पश्येयं कर-धृत-मृगं खण्ड-परशुम् 25

कदा वा त्वां दृश्ट्वा गिरिश तव भव्यान्घ्रि-युगलं
गृहीत्वा हस्ताभ्यां शिरसि नयने वक्शसि वहन्
समाश्लिश्याघ्राय स्फुट-जलज-गन्धान् परिमलान्-
अलभ्यां ब्रह्माद्यैर्-मुदम्-अनुभविश्यामि हृदये 26

करस्थे हेमाद्रौ गिरिश निकटस्थे धन-पतौ
गृहस्थे स्वर्भूजा(अ)मर-सुरभि-चिन्तामणि-गणे
शिरस्थे शीतांशौ चरण-युगलस्थे(अ)खिल शुभे
कम्-अर्थं दास्ये(अ)हं भवतु भवद्-अर्थं मम मनः 27

सारूप्यं तव पूजने शिव महा-देवेति सङ्कीर्तने
सामीप्यं शिव भक्ति-धुर्य-जनता-साङ्गत्य-सम्भाशणे
सालोक्यं च चराचरात्मक-तनु-ध्याने भवानी-पते
सायुज्यं मम सिद्धिम्-अत्र भवति स्वामिन् कृतार्थोस्म्यहम् 28

त्वत्-पादाम्बुजम्-अर्चयामि परमं त्वां चिन्तयामि-अन्वहं
त्वाम्-ईशं शरणं व्रजामि वचसा त्वाम्-एव याचे विभो
वीक्शां मे दिश चाक्शुशीं स-करुणां दिव्यैश्-चिरं प्रार्थितां
शम्भो लोक-गुरो मदीय-मनसः सौख्योपदेशं कुरु 29

वस्त्रोद्-धूत विधौ सहस्र-करता पुश्पार्चने विश्णुता
गन्धे गन्ध-वहात्मता(अ)न्न-पचने बहिर्-मुखाध्यक्शता

पात्रॆ कान्चन-गर्भतास्ति मयि चॆद् बालॆन्दु चूडा-मणॊ
शुश्रूशां करवाणि तॆ पशु-पतॆ स्वामिन् त्रि-लॊकी-गुरॊ 30

नालं वा परमॊपकारकम्-इदं त्वॆकं पशूनां पतॆ
पश्यन् कुक्शि-गतान् चराचर-गणान् बाह्यस्थितान् रक्शितुम्
सर्वामर्त्य-पलायनौशधम्-अति-ज्वाला-करं भी-करं
निक्शिप्तं गरलं गलॆ न गलितं नॊद्गीर्णम्-ऎव-त्वया 31

ज्वालॊग्रः सकलामराति-भयदः क्श्वॆलः कथं वा त्वया
दृश्टः किं च करॆ धृतः कर-तलॆ किं पक्व-जम्बू-फलम्
जिह्वायां निहितश्च सिद्ध-घुटिका वा कण्ठ-दॆशॆ भृतः
किं तॆ नील-मणिर्-विभूशणम्-अयं शम्भॊ महात्मन् वद 32

नालं वा सकृद्-ऎव दॆव भवतः सॆवा नतिर्-वा नुतिः
पूजा वा स्मरणं कथा-श्रवणम्-अपि-आलॊकनं मादृशाम्
स्वामिन्न्-अस्थिर-दॆवतानुसरणायासॆन किं लभ्यतॆ
का वा मुक्तिर्-इतः कुतॊ भवति चॆत् किं प्रार्थनीयं तदा 33

किं ब्रूमस्-तव साहसं पशु-पतॆ कस्यास्ति शम्भॊ भवद्-
धैर्यं चॆदृशम्-आत्मनः-स्थितिर्-इयं चान्यैः कथं लभ्यतॆ
भ्रश्यद्-दॆव-गणं त्रसन्-मुनि-गणं नश्यत्-प्रपन्चं लयं
पश्यन्-निर्भय ऎक ऎव विहरति-आनन्द-सान्द्रॊ भवान् 34

यॊग-क्शॆम-धुरं-धरस्य सकलः-श्रॆयः प्रदॊद्यॊगिनॊ
दृश्टादृश्ट-मतॊपदॆश-कृतिनॊ बाह्यान्तर-व्यापिनः

सर्वज्नस्य दया-करस्य भवतः किं वॆदितव्यं मया
शम्भॊ त्वं परमान्तरङ्ग इति मॆ चित्तॆ स्मरामि-अन्वहम् 35

भक्तॊ भक्ति-गुणावृतॆ मुद्-अमृता-पूर्णॆ प्रसन्नॆ मनः
कुम्भॆ साम्ब तवान्घ्रि-पल्लव युगं संस्थाप्य संवित्-फलम्
सत्त्वं मन्त्रम्-उदीरयन्-निज शरीरागार शुद्धिं वहन्
पुण्याहं प्रकटी करॊमि रुचिरं कल्याणम्-आपादयन् 36

आम्नायाम्बुधिम्-आदरॆण सुमनः-सन्घाः-समुद्यन्-मनॊ
मन्थानं दृढ भक्ति-रज्जु-सहितं कृत्वा मथित्वा ततः
सॊमं कल्प-तरुं सु-पर्व-सुरभिं चिन्ता-मणिं धीमतां
नित्यानन्द-सुधां निरन्तर-रमा-सौभाग्यम्-आतन्वतॆ 37

प्राक्-पुण्याचल-मार्ग-दर्शित-सुधा-मूर्तिः प्रसन्नः-शिवः
सॊमः-सद्-गुण-सॆवितॊ मृग-धरः पूर्णास्-तमॊ-मॊचकः
चॆतः पुश्कर-लक्शितॊ भवति चॆद्-आनन्द-पाथॊ-निधिः
प्रागल्भ्यॆन विजृम्भतॆ सुमनसां वृत्तिस्-तदा जायतॆ 38

धर्मॊ मॆ चतुर्-अन्घ्रिकः सुचरितः पापं विनाशं गतं
काम-क्रॊध-मदादयॊ विगलिताः कालाः सुखाविश्कृताः
ज्नानानन्द-महौशधिः सुफलिता कैवल्य नाथॆ सदा
मान्यॆ मानस-पुण्डरीक-नगरॆ राजावतंसॆ स्थितॆ 39

धी-यन्त्रॆण वचॊ-घटॆन कविता-कुल्यॊपकुल्याक्रमैर्-
आनीतैश्च सदाशिवस्य चरिताम्भॊ-राशि-दिव्यामृतैः

हृत्-कॆदार-युताश्-च भक्ति-कलमाः साफल्यम्-आतन्वतॆ
दुर्भिक्शान्-मम सॆवकस्य भगवन् विश्वॆश भीतिः कुतः 40

पापॊत्पात-विमॊचनाय रुचिरैश्वर्याय मृत्युं-जय
स्तॊत्र-ध्यान-नति-प्रदिक्शिण-सपर्यालॊकनाकर्णनॆ
जिह्वा-चित्त-शिरॊन्घ्रि-हस्त-नयन-श्रॊत्रैर्-अहम् प्रार्थितॊ
माम्-आज्नापय तन्-निरूपय मुहुर्-मामॆव मा मॆ(अ)वचः 41

गाम्भीर्यं परिखा-पदं घन-धृतिः प्राकार-उद्यद्-गुण
स्तॊमश्-चाप्त-बलं घनॆन्द्रिय-चयॊ द्वाराणि दॆहॆ स्थितः
विद्या-वस्तु-समृद्धिर्-इति-अखिल-सामग्री-समॆतॆ सदा
दुर्गाति-प्रिय-दॆव मामक-मनॊ-दुर्गॆ निवासं कुरु 42

मा गच्च त्वम्-इतस्-ततॊ गिरिश भॊ मय्यॆव वासं कुरु
स्वामिन्न्-आदि किरात मामक-मनः कान्तार-सीमान्तरॆ
वर्तन्तॆ बहुशॊ मृगा मद-जुशॊ मात्सर्य-मॊहादयस्-
तान् हत्वा मृगया-विनॊद रुचिता-लाभं च सम्प्राप्स्यसि 43

कर-लग्न मृगः करीन्द्र-भन्गॊ
घन शार्दूल-विखण्डनॊ(अ)स्त-जन्तुः
गिरिशॊ विशद्-आकृतिश्-च चॆतः
कुहरॆ पन्च मुखॊस्ति मॆ कुतॊ भीः 44

चन्दः-शाखि-शिखान्वितैर्-द्विज-वरैः संसॆवितॆ शाश्वतॆ
सौख्यापादिनि खॆद-भॆदिनि सुधा-सारैः फलैर्-दीपितॆ

चेतः पक्शि-शिखा-मणे त्यज वृथा-सन्चारम्-अन्यैर्-अलं
नित्यं शन्कर-पाद-पद्म-युगली-नीडे विहारं कुरु 45

आकीर्णे नख-राजि-कान्ति-विभवैर्-उद्यत्-सुधा-वैभवैर्-
आधौतेपि च पद्म-राग-ललिते हंस-व्रजैर्-आश्रिते
नित्यं भक्ति-वधू गणैश्-च रहसि स्वेच्चा-विहारं कुरु
स्थित्वा मानस-राज-हंस गिरिजा नाथान्घ्रि-सौधान्तरे 46

शम्भु-ध्यान-वसन्त-सन्गिनि हृदारामे(अ)घ-जीर्णच्चदाः
स्रस्ता भक्ति लताच्चटा विलसिताः पुण्य-प्रवाल-श्रिताः
दीप्यन्ते गुण-कोरका जप-वचः पुश्पाणि सद्-वासना
ज्नानानन्द-सुधा-मरन्द-लहरी संवित्-फलाभ्युन्नतिः 47

नित्यानन्द-रसालयं सुर-मुनि-स्वान्ताम्बुजाताश्रयं
स्वच्चं सद्-द्विज-सेवितं कलुश-हृत्-सद्-वासनाविश्कृतम्
शम्भु-ध्यान-सरोवरं व्रज मनो-हंसावतंस स्थिरं
किं क्शुद्राश्रय-पल्वल-भ्रमण-सञ्जात-श्रमं प्राप्स्यसि 48

आनन्दामृत-पूरिता हर-पदाम्भोजालवालोद्यता
स्थैर्योपघ्नम्-उपेत्य भक्ति लतिका शाखोपशाखान्विता
उच्चैर्-मानस-कायमान-पटलीम्-आक्रम्य निश्-कल्मशा
नित्याभीश्ट-फल-प्रदा भवतु मे सत्-कर्म-संवर्धिता 49

सन्ध्यारम्भ-विजृम्भितं श्रुति-शिर-स्थानान्तर्-आधिश्ठितं
स-प्रेम भ्रमराभिराम्म्-असकृत् सद्-वासना-शोभितम्

भोगीन्द्राभरणं समस्त-सुमनः-पूज्यं गुणाविश्कृतं
सेवे श्री-गिरि-मल्लिकार्जुन-महा-लिन्गं शिवालिन्गितम् 50

भृन्गीच्चा-नटनोत्कटः करि-मद-ग्राही स्फुरन्-माधव-
आह्लादो नाद-युतो महासित-वपुः पन्चेशुणा चादृतः
सत्-पक्शः सुमनो-वनेशु स पुनः साक्शान्-मदीये मनो
राजीवे भ्रमराधिपो विहरतां श्री शैल-वासी विभुः 51

कारुण्यामृत-वर्शिणं घन-विपद्-ग्रीशमच्चिदा-कर्मठं
विद्या-सस्य-फलोदयाय सुमनः-संसेव्यम्-इच्चाकृतिम्
नृत्यद्-भक्त-मयूरम्-अद्रि-निलयं चन्चज्-जटा-मण्डलं
शम्भो वान्चति नील-कन्धर-सदा त्वां मे मनश्-चातकः 52

आकाशेन शिखी समस्त फणिनां नेत्रा कलापी नता-
(अ)नुग्राहि-प्रणवोपदेश-निनदैः केकीति यो गीयते
श्यामां शैल-समुद्भवां घन-रुचिं दृश्ट्वा नटन्तं मुदा
वेदान्तोपवने विहार-रसिकं तं नील-कण्ठं भजे 53

सन्ध्या घर्म-दिनात्ययो हरि-कराघात-प्रभूतानक-
ध्वानो वारिद गर्जितं दिविशदां दृश्टिच्चटा चन्चला
भक्तानां परितोश बाश्प विततिर्-वृश्टिर्-मयूरी शिवा
यस्मिन्न्-उज्ज्वल-ताण्डवं विजयते तं नील-कण्ठं भजे 54

आद्यायामित-तेजसे-श्रुति-पदैर्-वेद्याय साध्याय ते
विद्यानन्द-मयात्मने त्रि-जगतः-संरक्शणोद्योगिने

ध्यॆयायाखिल-यॊगिभिः-सुर-गणैर्-गॆयाय मायाविनॆ
सम्यक् ताण्डव-सम्भ्रमाय जटिनॆ सॆयं नतिः-शम्भवॆ 55

नित्याय त्रि-गुणात्मनॆ पुर-जितॆ कात्यायनी-श्रॆयसॆ
सत्यायादि कुटुम्बिनॆ मुनि-मनः प्रत्यक्श-चिन्-मूर्तयॆ
माया-सृश्ट-जगत्-त्रयाय सकल-आम्नायान्त-सन्चारिणॆ
सायं ताण्डव-सम्भ्रमाय जटिनॆ सॆयं नतिः-शम्भवॆ 56

नित्यं स्वॊदर-पॊशणाय सकलान्-उद्दिश्य वित्ताशया
व्यर्थं पर्यटनं करॊमि भवतः-सॆवां न जानॆ विभॊ
मज्-जन्मान्तर-पुण्य-पाक-बलतस्-त्वं शर्व सर्वान्तरस्-
तिश्ठस्यॆव हि तॆन वा पशु-पतॆ तॆ रक्शणीयॊ(अ)स्म्यहम् 57

ऎकॊ वारिज-बान्धवः क्शिति-नभॊ व्याप्तं तमॊ-मण्डलं
भित्वा लॊचन-गॊचरॊपि भवति त्वं कॊटि-सूर्य-प्रभः
वॆद्यः किं न भवस्यहॊ घन-तरं कीदृन्ग्भवॆन्-मत्तमस्-
तत्-सर्वं व्यपनीय मॆ पशु-पतॆ साक्शात् प्रसन्नॊ भव 58

हंसः पद्म-वनं समिच्चति यथा नीलाम्बुदं चातकः
कॊकः कॊक-नद-प्रियं प्रति-दिनं चन्द्रं चकॊरस्-तथा
चॆतॊ वान्चति मामकं पशु-पतॆ चिन्-मार्ग मृग्यं विभॊ
गौरी नाथ भवत्-पदाब्ज-युगलं कैवल्य-सौख्य-प्रदम् 59

रॊधस्-तॊयहृतः श्रमॆण-पथिकश्-चायां तरॊर्-वृश्टितः
भीतः स्वस्थ गृहं गृहस्थम्-अतिथिर्-दीनः प्रभं धार्मिकम्

दीपं सन्तमसाकुलश्-च शिखिनं शीतावृतस्-त्वं तथा
चेतः-सर्व-भयापहं-व्रज सुखं शम्भोः पदाम्भोरुहम् 60

अन्कोलं निज बीज सन्ततिर्-अयस्कान्तोपलं सूचिका
साध्वी नैज विभुं लता क्शिति-रुहं सिन्धुह्-सरिद्-वल्लभम्
प्राप्नोतीह यथा तथा पशु-पतेः पादारविन्द-द्वयं
चेतोवृत्तिर्-उपेत्य तिश्ठति सदा सा भक्तिर्-इति-उच्यते 61

आनन्दाश्रुभिर्-आतनोति पुलकं नैर्मल्यतश्-चादनं
वाचा शन्ख मुखे स्थितैश्-च जठरा-पूर्तिं चरित्रामृतैः
रुद्राक्शैर्-भसितेन देव वपुशो रक्शां भवद्-भावना-
पर्यन्के विनिवेश्य भक्ति जननी भक्तार्भकं रक्शति 62

मार्गा-वर्तित पादुका पशु-पतेर्-अङ्गस्य कूर्चायते
गण्डूशाम्बु-निशेचनं पुर-रिपोर्-दिव्याभिशेकायते
किन्चिद्-भक्शित-मांस-शेश-कबलं नव्योपहारायते
भक्तिः किं न करोति-अहो वन-चरो भक्तावतम्सायते 63

वक्शस्ताडनम्-अन्तकस्य कठिनापस्मार सम्मर्दनं
भू-भृत्-पर्यटनं नमत्-सुर-शिरः-कोटीर सन्घर्शणम्
कर्मेदं मृदुलस्य तावक-पद-द्वन्द्वस्य गौरी-पते
मच्चेतो-मणि-पादुका-विहरणं शम्भो सदान्गी-कुरु 64

वक्शस्-ताडन शन्कया विचलितो वैवस्वतो निर्जराः
कोटीरोज्ज्वल-रत्न-दीप-कलिका-नीराजनं कुर्वते

दृश्ट्वा मुक्ति-वधूस्-तनोति निभृताश्लेशं भवानी-पते
यच्-चेतस्-तव पाद-पद्म-भजनं तस्येह किं दुर्-लभम् 65

क्रीडार्थं सृजसि प्रपन्चम्-अखिलं क्रीडा-मृगास्-ते जनाः
यत्-कर्माचरितं मया च भवतः प्रीत्यै भवत्येव तत्
शम्भो स्वस्य कुतूहलस्य करणं मच्चेश्टितं निश्चितं
तस्मान्-मामक रक्शणं पशु-पते कर्तव्यम्-एव त्वया 66

बहु-विध-परितोश-बाश्प-पूर-
स्फुट-पुलकान्कित-चारु-भोग-भूमिम्
चिर-पद-फल-कान्क्शि-सेव्यमानां
परम सदाशिव-भावनां प्रपद्ये 67

अमित-मुदमृतं मुहुर्-दुहन्तीं
विमल-भवत्-पद-गोश्ठम्-आवसन्तीम्
सदय पशु-पते सुपुण्य-पाकां
मम परिपालय भक्ति धेनुम्-एकाम् 68

जडता पशुता कलन्किता
कुटिल-चरत्वं च नास्ति मयि देव
अस्ति यदि राज-मौले
भवद्-आभरणस्य नास्मि किं पात्रम् 69

अरहसि रहसि स्वतन्त्र-बुद्ध्या
वरि-वसितुं सुलभः प्रसन्न-मूर्तिः

अगणित फल-दायकः प्रभुर्-मे
जगद्-अधिको हृदि राज-शेखरोस्ति 70

आरूढ-भक्ति-गुण-कुन्चित-भाव-चाप-
युक्तैः-शिव-स्मरण-बाण-गणैर्-अमोघैः
निर्जित्य किल्बिश-रिपून् विजयी सुधीन्द्रः-
सानन्दम्-आवहति सुस्थिर-राज-लक्श्मीम् 71

ध्यानान्जनेन समवेक्श्य तमः-प्रदेशं
भित्वा महा-बलिभिर्-ईश्वर नाम-मन्त्रैः
दिव्याश्रितं भुजग-भूशणम्-उद्वहन्ति
ये पाद-पद्मम्-इह ते शिव ते कृतार्थाः 72

भू-दारताम्-उदवहद्-यद्-अपेक्शया श्री-
भू-दार एव किमतः सुमते लभस्व
केदारम्-आकलित मुक्ति महौशधीनां
पादारविन्द भजनं परमेश्वरस्य 73

आशा-पाश-क्लेश-दुर्-वासनादि-
भेदोद्युक्तैर्-दिव्य-गन्धैर्-अमन्दैः
आशा-शाटीकस्य पादारविन्दं
चेतः-पेटीं वासितां मे तनोतु 74

कल्याणिनं सरस-चित्र-गतिं सवेगं
सर्वेन्गितज्नम्-अनघं ध्रुव-लक्शणाढ्यम्

चॆतस्-तुरन्गम्-अधिरुह्य चर स्मरारॆ
नॆतः-समस्त जगतां वृशभाधिरूढ 75

भक्तिर्-महॆश-पद-पुश्करम्-आवसन्ती
कादम्बिनीव कुरुतॆ परितॊश-वर्शम्
सम्पूरितॊ भवति यस्य मनस्-तटाकस्-
तज्-जन्म-सस्यम्-अखिलं सफलं च नान्यत् 76

बुद्धिः-स्थिरा भवितुम्-ईश्वर-पाद-पद्म
सक्ता वधूर्-विरहिणीव सदा स्मरन्ती
सद्-भावना-स्मरण-दर्शन-कीर्तनादि
सम्मॊहितॆव शिव-मन्त्र-जपॆन विन्तॆ 77

सद्-उपचार-विधिशु-अनु-बॊधितां
सविनयां सुहृदं सदुपाश्रिताम्
मम समुद्धर बुद्धिम्-इमां प्रभॊ
वर-गुणॆन नवॊढ-वधूम्-इव 78

नित्यं यॊगि-मनह्-सरॊज-दल-सन्चार-क्शमस्-त्वत्-क्रमः-
शम्भॊ तॆन कथं कठॊर-यम-राड्-वक्शः-कवाट-क्शतिः
अत्यन्तं मृदुलं त्वद्-अन्घ्रि-युगलं हा मॆ मनश्-चिन्तयति-
ऎतल्-लॊचन-गॊचरं कुरु विभॊ हस्तॆन संवाहयॆ 79

ऐश्यत्यॆश जनिं मनॊ(अ)स्य कठिनं तस्मिन्-नटानीति मद्-
रक्शायै गिरि सीम्नि कॊमल-पद-न्यासः पुराभ्यासितः

नॊ-चॆद्-दिव्य-गृहान्तरॆशु सुमनस्-तल्पॆशु वॆद्यादिशु
प्रायः-सत्सु शिला-तलॆशु नटनं शम्भॊ किमर्थं तव 80

कन्चित्-कालम्-उमा-महॆश भवतः पादारविन्दार्चनैः
कन्चिद्-ध्यान-समाधिभिश्-च नतिभिः कन्चित् कथाकर्णनैः
कन्चित् कन्चिद्-अवॆक्शणैश्-च नुतिभिः कन्चिद्-दशाम्-ईदृशीं
यः प्राप्नॊति मुदा त्वद्-अर्पित मना जीवन् स मुक्तः खलु 81

बाणत्वं वृशभत्वम्-अर्ध-वपुशा भार्यात्वम्-आर्या-पतॆ
घॊणित्वं सखिता मृदन्ग वहता चॆत्यादि रूपं दधौ
त्वत्-पादॆ नयनार्पणं च कृतवान् त्वद्-दॆह भागॊ हरिः
पूज्यात्-पूज्य-तरः-स ऎव हि न चॆत् कॊ वा तदन्यॊ(अ)धिकः 82

जनन-मृति-युतानां सॆवया दॆवतानां
न भवति सुख-लॆशः संशयॊ नास्ति तत्र
अजनिम्-अमृत रूपं साम्बम्-ईशं भजन्तॆ
य इह परम सौख्यं तॆ हि धन्या लभन्तॆ 83

शिव तव परिचर्या सन्निधानाय गौर्या
भव मम गुण-धुर्यां बुद्धि-कन्यां प्रदास्यॆ
सकल-भुवन-बन्धॊ सच्चिद्-आनन्द-सिन्धॊ
सदय हृदय-गॆहॆ सर्वदा संवस त्वम् 84

जलधि मथन दक्शॊ नैव पाताल भॆदी
न च वन मृगयायां नैव लुब्धः प्रवीणः

अशन-कुसुम-भूशा-वस्त्र-मुख्यां सपर्यां
कथय कथम्-अहं तॆ कल्पयानीन्दु-मौलॆ 85

पूजा-द्रव्य-समृद्धयॊ विरचिताः पूजां कथं कुर्महॆ
पक्शित्वं न च वा कीटित्वम्-अपि न प्राप्तं मया दुर्-लभम्
जानॆ मस्तकम्-अन्घ्रि-पल्लवम्-उमा-जानॆ न तॆ(अ)हं विभॊ
न ज्नातं हि पितामहॆन हरिणा तत्त्वॆन तद्-रूपिणा 86

अशनं गरलं फणी कलापॊ
वसनं चर्म च वाहनं महॊक्शः
मम दास्यसि किं किम्-अस्ति शम्भॊ
तव पादाम्बुज-भक्तिम्-ऎव दॆहि 87

यदा कृताम्भॊ-निधि-सॆतु-बन्धनः
करस्थ-लाधः-कृत-पर्वताधिपः
भवानि तॆ लन्घित-पद्म-सम्भवस्-
तदा शिवार्चा-स्तव भावन-क्शमः 88

नतिभिर्-नुतिभिस्-त्वम्-ईश पूजा
विधिभिर्-ध्यान-समाधिभिर्-न तुश्टः
धनुशा मुसलॆन चाश्मभिर्-वा
वद तॆ प्रीति-करं तथा करॊमि 89

वचसा चरितं वदामि शम्भॊर्-
अहम्-उद्यॊग विधासु तॆ(अ)प्रसक्तः

मनसाकृतिम्-ईश्वरस्य सॆवॆ
शिरसा चैव सदाशिवं नमामि 90

आद्या(अ)विद्या हृद्-गता निर्गतासीत्-
विद्या हृद्या हृद्-गता त्वत्-प्रसादात्
सॆवॆ नित्यं श्री-करं त्वत्-पदाब्जं
भावॆ मुक्तॆर्-भाजनं राज-मौलॆ 91

दूरीकृतानि दुरितानि दुरक्शराणि
दौर्-भाग्य-दुःख-दुरहङ्कृति-दुर्-वचांसि
सारं त्वदीय चरितं नितरां पिबन्तं
गौरीश माम्-इह समुद्धर सत्-कटाक्शैः 92

सॊम कला-धर-मौलौ
कॊमल घन-कन्धरॆ महा-महसि
स्वामिनि गिरिजा नाथॆ
मामक हृदयं निरन्तरं रमताम् 93

सा रसना तॆ नयनॆ
तावॆव करौ स ऎव कृत-कृत्यः
या यॆ यौ यॊ भर्गं
वदतीक्शॆतॆ सदार्चतः स्मरति 94

अति मृदुलौ मम चरणौ-
अति कठिनं तॆ मनॊ भवानीश

इति विचिकित्सां सन्त्यज
शिव कथम्-आसीद्-गिरौ तथा प्रवॆशः 95

धैयान्कुशॆन निभृतं
रभसाद्-आकृश्य भक्ति-शृन्खलया
पुर-हर चरणालानॆ
हृदय-मदॆभं बधान चिद्-यन्त्रैः 96

प्रचरत्यभितः प्रगल्भ-वृत्त्या
मदवान्-ऎश मनः-करी गरीयान्
परिगृह्य नयॆन भक्ति-रज्ज्वा
परम स्थाणु-पदं दृढं नयामुम् 97

सर्वालन्कार-युक्तां सरल-पद-युतां साधु-वृत्तां सुवर्णां
सद्भिः-सम्स्तूय-मानां सरस गुण-युतां लक्शितां लक्शणाढ्याम्
उद्यद्-भूशा-विशॆशाम्-उपगत-विनयां द्यॊत-मानार्थ-रॆखां
कल्याणीं दॆव गौरी-प्रिय मम कविता-कन्यकां त्वं गृहाण 98

इदं तॆ युक्तं वा परम-शिव कारुण्य जलधॆ
गतौ तिर्यग्-रूपं तव पद-शिरॊ-दर्शन-धिया
हरि-ब्रह्माणौ तौ दिवि भुवि चरन्तौ श्रम-युतौ
कथं शम्भॊ स्वामिन् कथय मम वॆद्यॊसि पुरतः 99

स्तॊत्रॆणालम्-अहं प्रवच्मि न मृशा दॆवा विरिन्चादयः
स्तुत्यानां गणना-प्रसन्ग-समयॆ त्वाम्-अग्रगण्यं विदुः

माहात्म्याग्र-विचारण-प्रकरणे धाना-तुशस्तोमवद्-
धूतास्-त्वां विदुर्-उत्तमोत्तम फलं शम्भो भवत्-सेवकाः 100

Web Url: http://www.vignanam.org/veda/shivananda-lahari-devanagari.html